# B.A. 2nd Semester (Honours) Examination, 2021
# SANSKRIT
## Paper: 202C-4
### [Classical Sanskrit Literature (Drama)]
## Course ID: 20912

**Time: 2 Hours** **Full Marks: 40**

***The figures in the margin indicate full marks.***

**1. अधोलिखितेषु प्रश्नेषु एकस्य प्रश्नस्योत्तरं प्रदेयम्।** **10x1=10**

क) शकुन्तलायाः पतिप्रेम वर्णनीयम्।

ख) दुर्वाससः शापवृत्तान्तं निर्वर्ण्य प्रकृतनाटके तदुपयोगित्वं सविशदं प्रतिपाद्यताम्।

ग) यौगन्धरायणचरितं वर्णनीयम्।

**२. द्वयोः कयोश्चिद् एकस्य श्लोकस्य संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या।** **5x1= 5**

क) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।

ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

ख) असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

**३. यथेच्छमेकस्य श्लोकस्य संस्कृतभाषया देवनागरीलिप्या सप्रसङ्गं व्याख्या कार्या।** **5x1= 5**

क) नैवेदानीं तादृशाश्चक्रवाका

नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।

धन्या सा स्त्री यां तथा वेत्ति भर्ता

भर्तृस्नेहात् सा हि दग्धाप्यदग्धा॥

ख) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।

प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥

**४. देवनागरीलिपिमाश्रित्य संस्कृतभाषया एकस्य भावसम्प्रसारणं कार्यम्।** **5x1= 5**

क) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

ख) न हि सिद्धवाक्यान्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि।

**५. यथेच्छं पञ्चानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम् ।** **1x5=5**

क) मनोहरम् (२.क) इत्यस्य सविग्रहसमासनाम लेख्यम् ।

ख) छेत्तुम् (२.क) इत्यस्य व्युत्पत्तिः का ?

ग) नीलोत्पलम् (२.क) इत्यस्य सविग्रहसमासनाम लेख्यम् ।

घ) सन्देहपदेषु (२.ख) इत्यस्य सकारणविभक्तिनिर्णयः कार्यः ।

ङ) वियुक्ताः (३.क) इत्यस्य व्युत्पत्तिः का ?

च) भर्तृस्नेहात् (३.क) इत्यस्य सकारणविभक्तिनिर्णयः कार्यः ।

छ) सोत्साहैः (३.ख) इत्यस्य सविग्रहसमासनाम लेख्यम् ।

**६. यथेच्छं पञ्च लघुप्रश्नाः समाधेयाः । द्वयोः प्रश्नयोः उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।** **2x5=10**

क) शकुन्तलायाः माता का ? तस्याश्च धर्मपिता कः ?

ख) अभिज्ञानशकुन्तलनाटकस्य विदूषकस्य नाम किम् ? अस्य नाटकस्य सर्वोत्तमः अङ्कः कः ?

ग) ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि ।

अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥-- इत्यस्य प्राकृतं रूपं लेखनीयम् ।

घ) स्वप्नवासवदत्तम् इति नाटकस्य नान्दी कीदृशी ? तत्र कस्य स्तुतिः दृश्यते ?

ङ) स्वप्नवासवदत्तम् इति नाटके उदयनस्य शत्रुः कोऽस्ति ? कश्च तस्य मन्त्री ?

च) शकुन्तलायाः सख्यौ के स्तः ? शकुन्तला कस्य पुत्री आसीत् ?

छ) स्वप्नवासवदत्तम् इति नाटकस्य स्वप्नाङ्कः कः ? अस्मिन् नाटके कति अङ्काः विद्यन्ते ?